International Journal of Sanskrit Research 2020; 6(4): 140-141

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(4): 140-141
© 2020 IJSR
www.anantaajournal.com
Received: 16-05-2020
Accepted: 18-06-2020

**पीताम्बर पौडेल**
विद्यावारिधिः, मीमांसाविभागः,
श्री.ला.ब.शा.रा.सं.वि., देहली,
भारत

**Corresponding Author:**
**पीताम्बर पौडेल**
विद्यावारिधिः, मीमांसाविभागः,
श्री.ला.ब.शा.रा.सं.वि., देहली,
भारत

# शाब्दबोधे मुख्यविशेष्यत्वम्

**पीताम्बर पौडेल**

## प्रस्तावना

शाब्दबोधः एव कृत्स्नस्य जगद्व्यवहारस्य निदानभूतः इति सर्वविदितम्। यतोहि नानेन विना लोकस्य अन्धकारनिवृत्तिः जायेत, तदेवोक्तं दण्डिना- "इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिः आसंसारं न दीप्यते"[1] इति। अतः बहूपादेयत्त्वात् विषयस्यास्य बह्वत्र शास्त्रेषु विचारः कृतः कारुणिकैराचार्यैः अस्मदीयैः। तत्र क्रमे पदवाक्यप्रमाणशास्त्राणां विशेषतः अवदानम्। यद्यपि शब्दजन्यः अर्थबोधः शाब्दबोधः इत्यत्र न कस्यापि केनापि सह मतभेदः किन्तु कथं तस्य बोधः, केन बोधः, कदा बोधः इत्यादिकस्थले नितरां भेदः दृश्यते। आदौ येन अर्थबोधः सः किंरूपः इति विचारणा, तत्र पदशास्त्रीयाः नागेशादयः "आप्तोपदेशः शब्दः प्रमाणं"[2] इति प्रतिपादयन्तः, रागद्वेषादिवशादपि नान्यथावदिनाम् उपदेशभूतशब्दानां, वेदस्य च शब्दानां प्रामाण्यमिति साधयन्ति। वस्तुतः शब्दः द्विविधः पदरूपः वाक्यरूपश्च, अतः शब्दभेदात् अर्थभेदो नैव कार्यः। शब्दलक्षणमुक्त्वा वैयकरणाः "एकोऽनवयवः शब्दः"[3] वदन्तः स्फोटस्यैव निरवयवस्य शब्दरूपत्वं साधयन्ति। तदनु एकाधिकशब्दबोधस्थले प्रत्येकस्य शब्दस्य कथम् अवबोधः इत्यत्र मुख्यविशेष्यकव्यवस्थया बोधः इति शास्त्रकाराणाम् सिद्धान्तः, तदेवोच्यते "अप्रधानभूतानेकार्थविशिष्टः एकः प्रधानपदार्थः शाब्दबोधे भासते"[4] इति। मुख्यविशेष्यत्वं नाम यस्मिन् पदार्थे अन्ये सर्वेऽपि पदार्थाः अन्विताः भवन्ति, स च पदार्थः न कुत्रापि अन्वितो भवति। अतः वैयाकरणाः "कारकाणां क्रियान्वयित्वम्" इति अनुभावयन्ति। तन्मते क्रिया हि धात्वर्थः। तेन "देवदत्तः तण्डुलं पचति" इत्यत्र तण्डुलपदोत्तरविद्यमानद्वितीयायाः कर्म अर्थः। तत्र तण्डुलस्य अन्वयः। कर्मणश्च धात्वर्थे पाके अन्वयः। तदनु "पचति" इत्यत्र विद्यमानस्य तिपः कर्ता अर्थः, तत्र देवदत्तस्य अभेदेन अन्वयः। पुनश्च कर्ता पाके अन्वयं प्राप्नोति। अतः "देवदत्ताभिन्नकर्तृकः तण्डुलकर्मकः पाकः" इति शाब्दबोधः। अयमेव धात्वर्थमुख्यविशेष्यकः बोधः इत्युच्यते। एवमेव "देवदत्तेन तण्डुलः पच्यते" इत्यत्रापि तृतीयायाः कर्ता अर्थः, तत्र देवदत्तस्य अभेदेन अन्वयः। कर्तुश्च पाके धात्वर्थे अन्वयः। आख्यातस्य तण्डुलपदोत्तरसुपः कर्म अर्थः। तस्मिन् तण्डुलस्याभेदेन अन्वयः। कर्मणश्च पाके धात्वर्थे अन्वयः। तस्मात् "देवदत्ताभिन्नकर्तृकः तण्डुलकर्मकः पाकः" इत्यन्वबोधः।

नैयायिकास्तु प्रथमान्तस्य मुख्यविशेष्यकत्वं वदन्तः, "देवदत्तः तण्डुलं पचति" इत्यादौ, द्वितीयायाः कर्मत्वम् अर्थः। तत्र आधेयतासम्बन्धेन तण्डुलस्य अन्वयः। कर्मत्वस्य च निरूपकतासम्बन्धेन धात्वर्थे पाके अन्वयः। एवञ्च आख्याते कृतौ अनुकूलतसम्बन्धेन धात्वर्थस्य पाकस्यान्वयः। कृतेश्च आश्रयतासम्बन्धेन देवदत्ते अन्वयः। तेन "तण्डुलनिष्ठकर्मतानिरूपकपाकानुकूलकृतिमान् देवदत्तः" इति शाब्दबोधः, यो हि प्रथमान्तमुख्यविशेष्यकबोधः।

तथैव "देवदत्तेन तण्डुलः पच्यते" इत्यत्र तृतीयायाः कृतिः अर्थः। तस्यां देवदत्तस्य समवायेनान्वयः। कृतेः जन्यतासम्बन्धेन धात्वर्थे पाके अन्वयः। आख्यातस्य तण्डुलपदोत्तरसुपः कर्मत्वमर्थः। तत्र निरूपितत्वसम्बन्धेन पाकस्यान्वयः। कर्मत्वस्य आश्रयतासम्बन्धेन प्रथमान्तार्थे तण्डुले अन्वयः। अतः "देवदत्तसमवेतकृतिजन्यपाकनिरूपितकर्मतावान् तण्डुलः" इति बोधः जायते। वैयाकरणभूषणादिग्रन्थेषु "प्रायशो वाक्यस्य सुप्तिङन्तसमुदायत्वात् सुबन्तानाञ्च प्रायः क्रियाविशेषणत्वात्" इत्यादिना तिङन्तरहितमपि वाक्यं वैयाकरणैः नैव निराक्रियते इति अभ्युपगम्यम्। वस्तुतः "आचार्यः प्रयाति, तस्य पादयोरभिवादय" इत्यादिकस्थलेषु "सर्वनाम्नानामुत्सर्गतः प्रधानपरामर्शित्वम्" इति न्यायबलात् तच्छब्देन सर्वनाम्ना धात्वर्थस्य, आख्यातार्थस्य वा कस्य मुख्यविशेष्यस्य ग्रहणमिति अन्वयानुपपत्तिर्जायेत किन्तु नैयायिकाभिमतप्रथमान्तमुख्यविशेष्यकाङ्गीकारे न कापि अनुपपत्तिः। यतोहि तच्छब्देन प्रथमान्तस्यैव आचार्यस्य ग्रहणं युक्तम्, इत्येवं नैयायिकानामपि बहुभिर्वादैः तर्कैश्च सिद्धन्तस्थापनं तत्र तत्र ग्रन्थेषु कृतमस्ति।

विचारशास्त्रीयाः मीमांसकाः "प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येन" इति व्युत्पत्तिबलात् प्रत्ययार्थस्यैव मुख्यविशेष्यकत्वं मन्वानाः दृश्यन्ते। स च प्रत्ययार्थः तिङर्थः, भावना, कृतिरिति वा उच्यते। "देवदत्तः तण्डुलं पचति" इत्यत्र प्रथमायाः कर्तृत्वमर्थः, देवदत्तस्य तत्र अभेदेनान्वयः, तस्य आख्यातार्थकृतौ अन्वयः। तण्डुलपदोत्तरद्वितीयायाः कर्मत्वमर्थः। तत्र आधेयतासम्बन्धेन तण्डुलस्यान्वयः। कर्मत्वस्य च स्वनिरूपकधात्वर्थपाकानुकूलत्वसम्बन्धेन आख्यातार्थकृतौ अन्वयः। तस्यामेव कृतौ देवदत्तस्य आधेयतासम्बन्धेन अन्वयः। पुनश्च धात्वर्थपाकस्य करणत्वसम्बन्धेन कृतौ अन्वयः। आहत्य "देवदत्तसमवेता तण्डुलकर्मकानुकूला पाककरणिका कृतिः" इति बोधो जायते आख्यातार्थमुख्यविशेष्यकवादिनां मते। एवञ्च यत्र केवलं "देवदत्तः पचति" इति द्वितीयान्तशून्यं वाक्यं श्रूयते तत्र धात्वर्थपाकस्य आख्यातार्थकृतौ कर्मतासम्बन्धेन अन्वयः कार्यः, तथा च "देवदत्तसमवेता पाककर्मिका कृतिः" इति बोध्यो भवति। पुनश्च "देवदत्तेन तण्डुलः पच्यते" इत्यत्र तृतीयायाः कर्तार्थः। तस्य स्वनिरूपकपाकानुकूलत्वसम्बन्धेन आख्यातार्थकृतौ अन्वयः। धात्वर्थपाकस्य स्वकरणकोदनोद्देश्यकत्वसम्बन्धेन कृतावेवान्वयः। आख्यातस्य तत्र कर्मत्वं भावना चार्थः। तयोः कर्मत्वे तण्डुलस्यान्वयः। कर्मत्वस्य च स्वनिरूपकपाकानुकूलत्वसम्बन्धेन कृतौ अन्वयः। तेन "देवदत्तकर्तृकपकानुकूला तण्डुलकर्मकपाकानुकूला पाककरणकौदनद्देश्यिका कृतिः" इत्यात्मको बोधो जायते। मीमांसकवैयाकरणयोः "भावप्रधानमाख्यातम्" इति नियमानुसारी शाब्दबोधो जायते। मीमांसकेषु जरन्मीमांसकाः जयन्तभट्टपादाः फलमुख्यविशेष्यकवादिनः। तेषां मते "देवदत्तः तण्डुलं पचति" इत्यत्र "देवदत्तसमवेतकृतिजन्यपाकजन्या तण्डुलनिष्ठा विक्लित्तिः" इति बोधो जायत इति।

## संदर्भ सूची


1. काव्यादर्शः,१.४.
2. वैयाकरणभूषणसारः.
3. वाक्यपदीयम्,२.१.२.
4. शाब्दबोधमीमांसा, प्र.भा,पृ.३२९.